# संस्कृतवार्ता:

दिनाङ्कः-29.09.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य राष्ट्रिय-राजधान्यां नवदेहल्यां भारतीय-जनता-पार्टीति दलस्य नवनिर्मित-कार्यालयस्य समुद्धघाटनमकरोत्।
- रक्षामन्त्रिणा श्रीराजनाथसिंहेन देशस्य मानवसुरक्षारूपरेखायां कृत्रिम-बुद्धिमत्ता-तन्त्रस्य ड्रोनयन्त्रस्य स्वचालित-प्रतिक्रिया-तन्त्रस्य च एकीकरणार्थं प्रबला प्रतिबद्धता प्रकटिता।
- रेलमन्त्री अश्विनी वैष्णवः अद्य बिहाराय त्रयाणाम् अमृतभारत-द्रुत-रेलयानानां समर्पणम् अकरोत्।
- केंद्रीय-स्वास्थ्य-परिवार-कल्याणमन्त्रिणा जगतप्रकाशनड्डावर्येण अद्य प्रोक्तं यत् "स्वस्थनारी–सशक्तपरिवार-अभियानस्य अन्तर्गतम् आराष्ट्रं नव-लक्षाधिक-स्वास्थ्य-शिविराणि आयोजितानि।
- भारतीय-ऋतु-विज्ञान-विभागेन अद्य सौराष्ट्र-कच्छ-प्रदेशयोः विभिन्न- स्थानेषु अतिवृष्टेः रक्तवर्णीया संचेतना प्रकटीकृता।
- आईएसएसएफ विश्व-चषक–कनिष्क स्पर्धायां, नव-दिल्ल्यां अद्य भारतस्य महिला–दशमीमीटर-वायु-भूसूण्डि स्पर्धायाम् उत्कृष्टं प्रदर्शनं कृतं।

---------------------------------------

प्रधानमन्त्री श्रीनरेन्द्रमोदी

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य राष्ट्रिय-राजधान्यां नवदेहल्यां भारतीय-जनता-पार्टीति दलस्य नवनिर्मित-कार्यालयस्य समुद्धघाटनमकरोत्। अवधेयं यत् त्रयोविंशाधिकद्विसहस्राब्दे जूनमासे भारतीयजनतापार्टीति दलस्य अध्यक्षः जगतप्रकाशनड्डाःएतस्य दलीयकार्यालयस्य आधारशिलां स्थापितवान् आसीत्। अद्य उद्घाटनावसरे प्रधानमन्त्रिणा कथितं यत् नवरात्रावसरे दलेनाद्य नवीनः कार्यालयः प्राप्तः, तच्च हर्षस्य विषयोस्ति, भारतीयजनतापार्टीति दलस्य स्थापना

अशीत्यधिकएकोनविंशे शताब्दे जाता आसीत् तदारभ्य कार्यकर्तारः अजस्रं पुरुषार्थं कृत्वाद्य दलं उन्नतशिखरं यावत् प्रापितवन्तः, अस्मिन् अवसरे भाजपेति दलस्य अध्यक्ष श्रीनड्डाः देहलीभाजपेतिदलीयः प्रमुखः श्रीविरेन्द्रसचदेवाः चापि समुपस्थितः आसीत्।

---

**राजनाथ - कमाण्डर-सम्मेलनम्**

रक्षामन्त्रिणा राजनाथसिंहेन देशस्य मानवसुरक्षारूपरेखायाम् कृत्रिम-बुद्धिमतातन्त्रस्य ड्रोनयन्त्रस्य स्वचालित-प्रतिक्रिया-तन्त्रस्य एकीकरणार्थं सबल-प्रतिबद्धता प्रकटिता। अद्य नवदेहल्यां द्वाचत्वारिंशे भारतीय-तटरक्षक-बल-नायकानां सम्मेलनस्य उद्घाटनसत्रं सम्बोधयन् श्रीसिंहः अवदत् यत् भारतीय-तटरक्षकबलैः आन्तार्जालिक-इलेक्ट्रानिक-युद्ध-सदृश-संकटेभ्यः रक्षणार्थं प्रशिक्षणम् उपकरणानि च निरन्तरम् उन्नतानि स्वानुकूलानि च करणीयानि। श्रीसिंहेन इदमपि प्रोक्तं यत् प्रतिक्रिया कालः अतीव न्यूनः करणीयः तदर्थं तत्परतां सुनिश्चेतुं स्वचालित-निरीक्षण-तन्त्रस्यापि विस्तारः व्यापकस्तरेण करणीयः इत्येतत् सर्वम् अत्यावश्यकं वर्तते। रक्षामन्त्रिणा सूचितं यत् प्रतिवेशि-देशेषु अस्थिरता-कारणात् शरणार्थिनः सामुद्र-मार्गेण प्रवेशस्य प्रयत्नं कुर्वन्ति, अतः समुद्रीया तटीया सुरक्षा च प्रभाविरूपेण करणीया। रक्षामन्त्रिणा राजनाथसिंहेन इदमपि यत् प्रकाशितं यत् अस्माकं महिलासैन्यबलम् अपि अग्रिमपङ्क्तौ कार्यरतम् अस्ति एतच्च प्रशंसनीयमस्ति, अन्ते च रक्षामन्त्रिणा कथितं यत् अस्माकं तटरक्षकबलं बाह्याभ्यन्तरसुरक्षां सुनिश्चेतुं महत्त्वपूर्णभूमिकां निर्वहति।

---

**वैष्णवः बिहारः**

रेलमन्त्री अश्विनी वैष्णवः बिहारस्य च उपमुख्यमन्त्री सम्राटचौधरी अद्य बिहाराय त्रयाणाम् अमृतभारत-द्रुत-रेलयानानां समर्पणम् अकुरुताम्। एतानि त्रीणि रेलयानानि मुजफ्फरपुरं चर्लापल्ली इत्यनेन दरभंगां च मदारजंक्शन इत्यनेन छपरां च आनन्दबिहारटर्मिनल इत्यनेन सह संयोजयिष्यन्ति। रेलमन्त्री नवदेहलीतः आभासीयपटलमाध्यमेन लोकापर्णनकार्यक्रमेण सह

समवेतः आसीत्, अपि च उपमुख्यमन्त्री सम्राट्-चौधरी पटनाजंक्शनतः एतेषां रेलयानानां शुभारम्भं हरितपताकोत्तलेन अकरोत्।

एतानि रेलयानानि अतिरिच्य चत्वारि यात्रीरेलयानानि नवादा-इस्मामपुर-बक्सर-झाझा-इत्यादीनि प्रमुखनगरैः सह संयुक्तानि भविष्यन्ति। एतैः अमृतभारतरेलयानैः राज्यस्य रेलसम्पर्कः इतोपि सुदृढो भविष्यति, अयञ्च बिहारस्य व्याजेन विकसितभारतसस्य संकल्पनायाः दिशि कश्चन विशिष्टपदक्रमो वर्तते। अन्ते च श्रीवैष्णवेन प्रोक्तं यत् पूर्वं रेलवेतन्त्राय केवलं सहस्रकोटिरूप्यकाणां वार्षिकव्ययप्रावधानं भवति स्म तच्च साम्प्रतं दशसहस्रकोटिरूप्यकाणि यावत् वर्धितमस्ति।

---------------------------------------

**जगतप्रकाशनड्डा**

केंद्रीयस्वास्थ्य-परिवार-कल्याणमन्त्रिणा जगतप्रकाशनड्डाः वर्येण अद्य उक्तं यत् "स्वस्थनारी–सशक्तपरिवार" अभियानस्य अन्तर्गतं राष्ट्रव्यापि नवलक्षाधिकानि-स्वास्थ्यशिविराणि आयोजितानि। अद्य नव-देल्ल्हयां निजसमाचारवाहिन्या आयोज्यमाने स्वास्थ्यसम्मेलने भाषमाणः श्रीनड्डाः अवदत् यत् त्रिय दशमलव षट्कोट्यधिकानां जनानां परीक्षणं एतस्य अभियान् अंतर्गतं जातम्। अक्टूबर मासस्य द्वितीय-दिनांके एषा संख्या चतुकोटितः अपि अधिकाभविष्यतीतिसम्भाव्यते।

---------------------------------------

**ऋतु-विभाग**

भारतीय-ऋतु-विज्ञान-विभागेन अद्य सौराष्ट्रकच्छ-प्रदेशयोः विभिन्न-विभिन्न स्थानेषु अतिवृष्टेः रक्तवर्णीय-संचेतना प्रकटीकृता। विभागेन गुजरात-कोंकण-गोवा-मध्यमहाराष्ट्र-क्षेत्रेषु अपि अद्य अतिवृष्टेः नारङ्गवर्णीय-संचेतना प्रकटीकृता।

---------------------------------------

**गोयलः- एफटीएएस**

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पीयूषगोयलः अवदत् यत् यूरोपीय-मुक्त-वाणिज्य-सङ्घीय-देशैः तद्धि आइसलैण्ड-उएचेंस्टीन-नार्वे-स्विट्जरलैण्ड इत्याख्यैः सह मुक्त-वाणिज्यीय-सन्धिः अक्तूबर-मासस्य प्रथमदिनाङ्कात् प्रभावी भविष्यति। गोयलः अद्य उक्तवान् यत् विकसितदेशाः भारतेन सह वाणिज्यिक-सन्धौ हस्तारक्षार्थम् इच्छुकाः सन्ति। उपर्युक्तानि तथ्यानि मन्त्रिणा अद्य ग्रेटर-नाएडा-मध्ये उत्तर-प्रदेश-अन्ताराष्ट्रिय-वाणिज्य-सम्मेलनस्य समापनावसरे प्रकटितानि।

----------------------------------------

## बीजेपी-एनडीए-डेलिगेशन

भारतीय-जनता-पार्टीति-दलस्य अध्यक्षः जगतप्रकाशनड्डाः अवदत् यत् तमिलनाडुराज्यस्य करूरमध्ये अभिनेतुः विजयथालापति इत्यस्य जनसभायाम् उत्कण्ठित-जन-भीति-संचारकारणात् जातायां घटनायां नैकेषां जनानां मृत्युः जातः, तत्र कथङ्कृत्वा इयं घटना प्रवृत्ता तस्य कारणान्वेषणार्थं किञ्चित् दलीय-प्रतिनिधिमण्डलं तत्र प्रेषितम् अस्ति। भाजपेतिदलीय-प्रतिनिधिमण्डलं प्रभावितपरिवारैः सह मेलयिष्यति, तथा च अध्यक्षाय समाख्यामपि प्रतिवेदयिष्यति।

----------------------------------------

## भूटान-रेलमार्ग:

भारत-भूटानदेशाभ्यां कोकराझार-गेलेफू , बनारहाट-समत्से इत्येतयोः मध्ये द्वौ सीमान्तरे-रेलसम्पर्कौ स्थापयितुं सहमति: अभिव्यक्ता। केन्द्रीयरेलमन्त्री अश्विनिवैष्णवः अवदत् यत् एषः नवतिः किलोमीटरमितं रेलमार्गः त्रयत्रिंशदधिकचतुरशतकोटिरूप्यकव्यये निर्मीयते।

----------------------------------------

## एफआईसीसीआई- निधिखरे

उपभोक्ताविभागस्य सचिव निधिखरे इत्यनया अद्य उक्तं यत् भारतस्य खुदरा-मुद्रास्फीतिः प्रायः एकवर्षपर्यन्तं स्थिरा आसीत्, या सप्तचत्वारिंशधिक-द्विसहस्रतंवर्षे विकसितभारतलक्ष्यस्य प्राप्तये आवश्यकी आसीत्।

---------------------------------------

**वियतनाम**

बुआलोइ झंझावातः इति वियतनामदेशे महतीं क्षतिम् अकरोत्। अस्मिन् प्रकोपे एकादशजनाः मृत्यमुपगताः, सप्तदश जनाः विलुप्ता सन्ति, त्रयस्त्रिंशत् जनाः वणिताः च ।

---------------------------------------

**आईएसएसफ**

आईएसएसएफ विश्व-चषक–कनिष्क स्पर्धायां, नव-दिल्ल्यां अद्य भारतस्य महिला–दशमीमीटर-वायु-भूसूण्डि स्पर्धायाम् उत्कृष्टं प्रदर्शनं अकरोत्।

।।इति वार्ता:।।